# पंचसुक्तानि

९२

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

२

(1)

॥ अथ पंचसत्कथारंभः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

पु० सू०

१

(2)

श्रीगणेशायनमः॥ ॥हरिःऽॐ३म्॥ ॥सहस्रशीर्षापुरुषः
सहस्राक्षःसहस्रपात्॥सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं॥
पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं॥उतामृतत्वस्येशानोयदन्नेना
तिरोहति॥एतावानस्यमहिमातोज्यायांश्चपूरुषः॥पादोस्य
विश्वाभूतानित्रिपादस्यामृतंदिवि॥त्रिपादूर्ध्वउदैत्पुरुषः
पादोस्येहाभवत्पुनः॥ततोविष्वङ्व्यक्रामत्साशनानशनेऽ
अभि॥तस्माद्विराळजायतविराजोअधिपूरुषः॥सजातोऽ १
अत्यरिच्यतपश्चाद्भूमिमथोपुरः॥यत्पुरुषेणहविषादेवाय
ज्ञमतन्वत॥वसंतोऽअस्यासीदाज्यंग्रीष्मऽइध्मःशरद्धविः॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः॥ तेनदेवाअयजंत
साध्याऽऋषयश्चये॥ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं॥
पशूंस्तांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये॥ तस्माद्यज्ञात्स
र्वहुतऋचःसामानिजज्ञिरे॥ छंदांसिजज्ञिरेतस्माद्यजुस्त
स्मादजायत॥ तस्मादश्वाऽअजायंतयेकेचोभयादतः॥ गा
वोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः॥ २॥ यत्पुरुषंव्य
दधुःकतिधाव्यकल्पयन्॥ मुखंकिमस्यकौबाहूकाऽऊरू
पादाऽउच्येते॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृ
तः॥ ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोऽअजायत॥ चंद्रमा

पु०सू०

मा मनसो जातश्चक्षोः सूर्यो ऽअजायत ॥ मुखादिंद्रश्चाग्निश्च
२ प्राणाद्वायुरजायत ॥ नाभ्या ऽआसीदंतरिक्षं शीर्ष्णो द्यौः स
मवर्तत ॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ ऽअकल्पयन् ॥
(3) सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ॥ देवा यद्य
ज्ञं तन्वाना ऽअबध्नन्पुरुषं पशुं ॥ यज्ञेन यज्ञमयजंत देवा
स्तानि धर्माणि प्रथमान्यासन् ॥ ते ह नाकं महिमानः स
चंत यत्र पूर्वे साध्याः संति देवाः ॥ ३ ॥ ॥ इति पुरुषसूक्तं स
माप्तः ॥ ॥ छ ॥ ॥ अथ पवमान सूक्तं पवनं कृत्वा ॥ ॥ २
॥ हरिः ऽओं ॥ ॥ न तं मंहो न दुरितं देवासो ऽअष्ट मर्त्यं ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(३a)

सजोषसोयमर्यमामित्रोनयंतिवरुणोऽअतिद्विषः॥
तध्यिवयंहृणीमहेवरुणमित्रार्यमन्॥येनानिरंहसो
यूयंपाथनेतीत्रमर्त्यमंतिद्विषः॥नेन्हूनंनोयमूतयेवरु
णोमित्रोऽअर्यमा॥नयिष्ठाउनोनेषणिपर्षिष्ठाउनः
पर्षण्यातिद्विषः॥यूयंविश्वंपरिपाथवरुणोमित्रोऽअ
र्यमा॥युष्माकंशर्मणिप्रियेस्यामसुप्रणीतयोतिद्वि
त्रिधो षः॥आदित्यासोऽअतिवरुणोमित्रोऽअर्यमा॥
उग्रंमरुद्भीरुद्रंहुवेमेंद्रमग्निंस्वस्तयेतिद्विषः॥नेतारऽ
ऊषुणस्तिरोवरुणोमित्रोऽअर्यमा॥अतिविश्वानि

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

सू०

२

(५)

दुरिताराजानश्चर्षणीनामतिद्विषः॥शुनमस्मभ्यमूत
येवरुणोमित्रोऽअर्यमा॥शर्मयछंतुसप्रथआदित्यासो
यदीमहेऽअतिद्विषः॥यथादनद्वसवोगौर्यंचित्पादिषि
तामभुंचथायजत्राः॥एवोष्वेऽस्मन्मुंचताव्यंहःप्रतार्यग्ने
प्रतरन्नऽआयुः॥१॥ ॥इतिसूक्तसमाप्तः॥ ॥हरिःऽओ
म्॥ ॥इतिवाइतिमेमनोगामश्वंसनुयामिति॥कुवि
त्सोमस्यापामिति॥प्रवाताऽइवदोधतऽउन्मापीताऽअ
यंसत॥कुवित्सो०॥उन्मापीताऽअयंसततरथमश्वाइवा २
शवः॥कुवित्सो०॥उपमामतिरस्थितवाश्रापुत्रमिवप्रि

(५A)

यं ॥ कुवित्सो० ॥ अहंतष्टेववंधुरं पर्यचामिहृदामतिं ॥ कुवि
त्सो० ॥ नहिमेऽअक्षिपच्चनाछांत्सुः पंचकृष्टयः ॥ कुवित्सो० ॥ १ ॥
नहिमेरोदसीऽउभेऽअन्यंपक्षंचनप्रति ॥ कुवित्सो० ॥ अभिद्यां
महिनाभुवमभीऽमांपृथिवीं महीं ॥ कुवित्सो० ॥ हंताहंपृथि
वीमिमांनिदधानीहवेहवा ॥ कुवित्सो० ॥ ओषमित्पृथि
वीमहंजंघनानीहवेहवा ॥ कुवित्सो० ॥ दिविमेऽअन्यःपक्षोऽ
धोऽअन्यमचीकृषं ॥ कुवित्सो० ॥ अहमस्मिमहामहो
ऽभिनभ्यमुदीषितः ॥ कुवित्सो० ॥ गृहोयाम्यरंकृतोदेवेभ्यो
हव्यवाहनः ॥ कुवित्सो० ॥ २ ॥ ॥ इतिसूक्तंसमाप्तः ॥ ॥ ७ ॥

ऋ०
४
(5)

हरिःऽॐदूम्॥ ॥अस्यवामस्यपलितस्यहोतुस्तस्यभ्रा
तामध्यमोऽअस्त्यश्नः॥ तृतीयोभ्राताघृतपृष्ठोअस्या
त्रापश्यंविश्पतिंसप्तपुत्रं॥ सप्तयुंजंतिरथमेकचक्रमे
कोऽअश्वोवहतिसप्तनामा॥ त्रिनाभिचक्रमजरमन
र्वंयत्रेमाविश्वाभुवनाधितस्थुः॥ इमंरथमधियेस
प्ततस्थुःसप्तचक्रंसप्तवहंत्यश्वाः॥ सप्तस्वसारोऽअभि
संनवंतेयत्रगवांनिहितासप्तनाम॥ कोददर्शप्रथमंजा ४
यमानमस्थन्वंतंयदनस्थाबिभर्ति॥ भूम्याऽअसुर

(5A) सृगात्माक्कास्वित्कोविद्वांसमुपगात्प्रष्टुमेतत् ॥ पाकः
पृच्छामिमनसाविजानन्देवानामेनानिहितापदानि ॥
वत्सेबष्कयेधिसप्ततंतून्वितत्निरेकवयऽओतवाउ ॥
॥ १ ॥ अचिकित्वांचिकितुषश्चिदत्रकवीन्पृच्छामिवि
वि द्मनेनविद्वान् ॥ यस्तस्तंभषळिमारजांस्यजस्यरू
पेकिमपिस्विदेकं ॥ इहब्रवीतुयऽईमंगवेदास्यवा
मस्यनिहितंपदंवेः ॥ शीर्ष्णःक्षीरंदुह्रतेगावोऽअस्य
वव्रिंवसानाऽउदकंपदापुः ॥ मातापितरमृतऽ

" Joint project of the Rajawada Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(6)
तृ०

आबभाजधीत्यग्रेमनसासंहिजग्मे॥साबीभत्सुर्गर्भ
५ रसानिविद्धानमस्वंतऽइदुपवाकमीयुः॥युक्तामा
तासीद्धुरिदक्षिणायाअतिष्ठद्गर्भोवृजनीष्वंतः॥अ
मीमेद्वत्सोअनुगामपश्यद्विश्वरूप्यंत्रिषुयोजनेषु॥
तिस्रोमातॄस्त्रीन्पितॄन्बिभ्रदेकऊर्ध्वस्तस्थौनेम
वग्लापयंति॥मंत्रयंतेदिवोऽअमुष्यपृष्ठेविश्व
विदंवाचमविश्वमिन्वां॥२॥द्वादशारंनहितज्जरा ५
यवर्वर्तिचक्रंपरिद्यामृतस्य॥आपुत्राऽअग्नेमि

(6A)

थुनासोऽअत्रसप्तशतानिविंशतिश्चतस्थुः॥पंचपादंपितरंद्वा
दशाकृतिंदिवऽआहुःपरेऽअर्धेपुरीषिणं॥अथेमेऽअन्यऽ
उपरेविचक्षणंसप्तचक्रेषडरआहुरर्पितं॥पंचारेचक्रेप
रिवर्तमानेतस्मिन्नातस्थुर्भुवनानिविश्वा॥तस्यनाक्षस्तप्य
तेभूरिभारःसनादेवनशीर्यतेसनाभिः॥सनेमिचक्रमज
रंविवावृतऽउत्तानायांदशयुक्तावहंति॥सूर्यस्यचक्षूरज
सैत्यावृतंतस्मिन्नार्पिताभुवनानिविश्वा॥साकंजानांसप्त
थमाहुरेकजंषडिद्यमाऋषयोदेवजाइति॥तेषामिष्टा
निविहितानिधामशःस्थात्रेरेजंतेविकृतानिरूपशः॥३॥
स्त्रियःसतीस्ताँऽउमेपुंसऽआहुःपश्यदक्षण्वा^विचेतदंधः॥

न्ने

वा०सू०

६

(7)

कविर्यःपुत्रःसईमाचिकेतयस्ताविजानात्सपितुष्पिता
सत्॥ अवःपरेणपरऽएनावरेणपदावत्संबिभ्रतीगौरुद्
स्थात्॥ साकद्रीचीकंस्विदर्धंपरागात्क्वस्वित्सूतेनहियूथे
अंतः॥ अवःपरेणपितरंयोऽअस्यानुवेदपरऽएनावरेण॥
कवीयमानःकइहप्रवोचद्देवंमनःकुतोऽअधिप्रजातं॥ येऽ
अर्वांचस्ताँऽउपराचऽआहुर्येपरांचस्ताँऽउऽअर्वाचऽआ
हुः॥ इंद्रश्चयाचक्रथुःसोमतानिधुरानयुक्तारजसोवहं
ति॥ द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते॥
तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योऽअभिचाकशीति॥४॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

यत्रासुपर्णाऽअमृतस्यभागमनिमेषंविदथाभिस्वरंति॥
इनोविश्वस्यभुवनस्यगोपाःसमाधीरःपाकमत्राविवेश॥
यस्मिन्वृक्षेमध्वदःसुपर्णानिविशंतेसुवतेचाधिविश्वे॥त
स्येदाहुःपिप्पलंस्वाद्वग्रेतन्नोन्नशद्यःपितरंनवेद॥यद्गा
यत्रेऽअधिगायत्रमाहितंत्रैष्टुभाद्वात्रैष्टुभंनिरतक्षत॥
यद्वाजगज्जगत्याहितंपदंयइत्तद्विदुस्तेऽअमृतत्वमान
शुः॥२॥गायत्रेणप्रतिमिमीतेऽअर्कमर्केणसाममत्रैष्टुभेनवाकं॥
वाकेनवाकंद्विपदाचतुष्पदाक्षरेणमिमतेसप्तवाणीः॥ज
गतासिंधुंदिव्यस्तभायद्रथंतरेसूर्यंपर्यपश्यत॥गायत्र

ति

स्यस मिधात्तिस्त्र ३ आऽकुस्त्रनोमद्भ्राग्रारिरिचेम दिवा ॥

५ ॥ उपह्वये सुदुघांधेनुमेतां सुहस्तोगोधुगेतनदोहदेनां ॥

श्रेष्ठंसवंसविता साविषन्नोभीद्धोघर्मस्तदुषुप्रवोचं ॥ हिं
कृण्वतीवसुपत्नीवसूनां वत्समिछंतीमनसाभ्यागात् ॥ दु
हामश्विभ्यांपयोऽघ्न्येयंसावर्धतांमहतेसौभगाय ॥ गौ
रमीमेदनुवत्संमिषंतंमूर्धानंहिंङ्ङकृणोन्मातवाऽउ ॥ सृ
क्वाणंघर्ममभिवावशानामिमातिमायुंपयतेपयोभिः ॥
अयंसशिंक्तेयेनगौरभीवृतामिमातिमायुंध्वसना
वधिश्रिता ॥ साचित्तिभिर्निहिचकारमर्त्यंविद्युद्भवं


Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

नीश्रातिवाद्रिमौद्रान ॥ अनछयेनुरगानुजीवमेजध्रू
वंमध्य ३ आपस्त्यानां ॥ जीवामृतनस्यच्चरातिस्वधाभि
रमर्त्योमर्त्येनासयोनिः ॥ ई ॥ अपन्श्यंगोपामनिपद्य
मानमाच्चपराच्चपथिभिश्चरंन ॥ ससध्रीचीःसविषू
चीर्वसानः ३ आवरीवर्तिभुवनेष्वंतः ॥ यईंचकारनसो
अस्यवेदयईंददर्शहिरुगिन्नुनस्मात् ॥ समातुर्योनाप
रिवीतो ३ अंतर्बहुप्रजानिरृतिमाविवेश ॥ द्यौर्मेपि
ताजनितानाभिरत्रबंधुर्मेमातापृथिवीमहीयं ॥ उत्ता
नयोश्चम्वो३र्योनिरंतरत्रापितादुहितुर्गर्भमाधात् ॥

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

वा०सू०

पृच्छामित्वापरमंतंपृथिव्याःपृच्छामियत्रभुवनस्यना
८ भिः॥पृच्छामित्वावृष्णोऽअश्वस्यरेतःपृच्छामिवाचः
(१) परमंव्योम॥इयंवेदिःपरोऽअंतःपृथिव्याऽअयं
यज्ञोभुवनस्यनाभिः॥अयंसोमोवृष्णोऽअश्वस्य
रेतोब्रह्मायंवाचःपरमंव्योम॥७॥सप्तार्धगर्भा
भुवनस्यरेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणि॥
तेधीतिभिर्मनसातेविपश्चितःपरिभुवःपरिभवं
तिविश्वतः॥नविजानामियदिवेदमास्मिनिण्यः ८
सन्नद्धोमनसाचरामि॥यदामागन्प्रथमजाऽ

(९A)

ऋतस्यादिद्वाचोऽअश्नुवेभागमस्याः॥ अपाङ्प्रा
ङेतिस्वधयागृभीतोऽमर्त्योमर्त्येनासयोनिः॥ ताशश्वं
ताविषूचीनावियंतान्य१न्यंचिक्युर्ननिचिक्यु
रन्यं॥ ऋचोऽअक्षरेपरमेव्योमन्यस्मिंदेवाऽअ
धिविश्वेनिषेदुः॥ यस्तन्नवेदकिमृचाकरि
ष्यतियऽइत्तद्विदुस्तऽइमेसमासते॥ सूयव
साद्भगवतीहिभूयाऽअथोवयंभगवंतःस्या
म॥ अद्धितृणमघ्न्येविश्वदानींपिबशुद्ध

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

वा०स्त०

१ मुदकमाचरंती॥८॥ ॥गौरीर्मिमाय
सलिलानितक्षत्येकपदीद्विपदीसाचतुष्प
(१०) दी॥अष्टापदीनवपदीबभूवुषीसहस्राक्ष
रापरमेव्योमन्॥तस्याःसमुद्राऽअधिवि
क्षरंतितेनजीवंतिप्रदिशश्चतस्रः॥ततः
क्षरत्यक्षरंतद्विश्वमुपजीवति॥शकमयं १
धूममारादपश्यंविषूवतापरऽएनावरेण॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai ... Joint project of the

(10A)

उक्षाणंपृश्निमपचंतवीरास्तानिधर्माणिप्र
थमान्यासन्॥त्रयःकेशिनऽऋतुथाविचक्ष
तेसंवत्सरेवपतऽएकऽएषां॥विश्वमेकोऽअ
भिचष्टेशचीभिर्ध्राजिरेकस्यददृशेनरूपं॥
चत्वारिवाक्परिमितापदानितानिविदुर्ब्रा
ह्मणायेमनीषिणः॥गुहात्रीणिनिहितानेंग
यंतितुरीयंवाचोमनुष्यावदंति॥इंद्रंमि

Joint project of The Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वा०सं०

२१

(११)

त्रं वरुणमाग्निमाहुरथो दिव्यः ससुपर्णोग
रुत्मान्॥ एकं सद्विप्रा बहुधा वदंत्यग्निं यमंमा
तरिश्वानमाहुः॥२॥ कृष्णं नियानं हरयः
सुपर्णाऽअपो वसाना दिवमुत्पतन्ति॥ तऽ
आवद्वृत्रन्त्सदनादृतस्यादिद्घृतेनपृथि
वी व्युद्यते॥ द्वादश प्रधयश्चक्रमेकं त्रीणि

(11A)

नभ्यानिकऽउतच्चिकेत ॥ तस्मिन्त्साकंत्रिश
तानशंकवोर्पिताःषष्टिर्नचलाचलासः ॥ य
पो स्तेस्तनःशशयोमयोभूर्येनेपुष्यासिवा विश्वा
र्याणि ॥ योरत्नधावसुविद्यःसुदत्रःसरस्व
तितमिहधातवेकः ॥ यज्ञेनयज्ञमयजंतदे
वास्तानिधर्माणिप्रथमान्यासन् ॥ तेह

नाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदे
वाः॥समानमेतदुदकमुच्चैत्यवचाहभिः॥भू
मिंपर्जन्याजिन्वंतिदिवंजिन्वंत्यग्नयः॥दिव्यंसु
पर्णंवायसंबृहंतमपांगर्भंदर्शतमोषधीनां॥
अभीपतोवृष्टिभिस्तर्पयंतंसरस्वंतमवसे
जोहवीमि॥५॥ ॥इतिवामनसूक्तसमाप्तः॥ 

(12A)

शके १७५७ पार्थिवनामसंवत्सरे मार्गशी
र्षकृष्णप्रतिपदायां इदौनाम्नी जोगळेकर इ
त्युपनामक यज्ञेश्वरात्मज महादेवेन लिखितं
इदं पुस्तकं कर्पे इत्युपनाम्नो रामाजी महा
देवस्य ॥ ॥ श्रीहरिहरप्रसन्न ॥ ॥ छ ॥ ॥ छ
छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

(13)

॥ इतिपंचरत्नक्रांतिसमाप्तः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com